# संस्कृत वार्ताः

## दिनाङ्कः :- 03/05/2026

## सायम् - 06:20

## आदौ मुख्यवार्ताः

- चतुर्णां राज्यानां एकस्य केन्द्र-शासित-प्रदेशस्य च नैर्वाचनिक मतगणनायै मञ्चः सज्जः अस्ति।
- निर्वाचन-आयोगेन पश्चिमबङ्गालस्य फाल्टा-विधानसभाक्षेत्रस्य सर्वेषु पञ्चाशीत्यधिक द्विशत मतदानकेन्द्रेषु पुनः मतदानस्य आदेशो प्रदत्तः मतदानम् अस्मिन् मासे एकविंशति दिनाङ्के भविष्यति।
- दिल्ल्याः विवेकविहारक्षेत्रे महती अग्निप्रकोपे नव जनाः मृताः।
- वर्तमानस्य पश्चिम-एशिया-द्वन्द्वस्य मध्ये, अग्रिमे मासे तैल-उत्पादनस्य लक्ष्यानि वर्धयितुं ओपेक-प्लस्-देशाः सिद्धान्तिक रूपेण सम्मताः जाताः।
- अद्य सम्पूर्णे विश्वस्मिन् विश्व-पत्रिकारिता-स्वातन्त्र्य-दिवसः आचर्यते।
- **अपि च**
- आई. पी. एल. क्रिकेट्-क्रीडायां, अद्य गुजरात् टाईटन्स् दलं पञ्जाब् किङ्ग्स् दलं सम्मुखी करिष्यति।

## अथ वार्ताः विस्तरेण

## मतगणना

पश्चिमबङ्गाल-असम-तमिळनाडु-केरल-पुदुच्चेरी- विधानसभा-निर्वाचनानाम् मतगणना श्वः प्रातः अष्टवादनात् समारप्स्यते । निर्वाचनायोगेन एतदर्थं सर्वाः सज्जताः कृताः। असमस्य षड्विंशत्यधिकैकशतमासनेषु,केरलस्य चत्त्वारिंशदधिकैकशतं, पुदुचेरी-केन्द्रशासितप्रदेशस्य त्रिंशदासनेषु च एप्रिलमासस्य नवदिनाङ्के मतदानमभवत्। एवमेव तमिलनाडोः चतुस्त्रिंशदधिक-द्विशतासनेषु सहैव पश्चिमबङ्गाले च प्रथमचरणाय द्विपञ्चाशदधिकैकशतमासनेषु च एप्रिलमासस्य त्रयोविंशति-दिनाङ्के मतदानम् अजायत।

पश्चिमबङ्गाले मतगणना सुरक्षायाः दृढ-प्रबन्धेषु सप्तसप्तति-मतगणना-केन्द्रेषु सम्पत्स्यते। आयोगेन मतगणना-केन्द्राणां परितः शान्ति-व्यवस्थायाः सुचारु-सञ्चालनाय व्यापक-प्रबन्धाः कृताः । अपरत्र असम-राज्ये विधानसभायाः षड्विंशत्यधिकैकशतं आसनानां कृते पञ्चत्रिंशत् जनपदानां चत्त्वारिंशत् केन्द्रेषु दृढ-सुरक्षा-व्यवस्थायां मतगणना भविष्यति। राज्ये एप्रिलमासस्य नवम-दिनाङ्के प्रायः षडाशीति-प्रतिशतं मतदानम् अभवत्। पुद्दुचेरी-विधानसभा-निर्वाचनस्य मत-गणनायै सुरक्षायाः पर्यवेक्षणस्य च सुदृढाः प्रबन्धाः कृताः । पुदुचेरी-राज्यस्य मुख्य-निर्वाचनाधिकारी पी.जवाहर: आकाशवाण्यै विज्ञापितवान् यत्

पुदुचेरी-क्षेत्रस्य सर्वेषां त्रिंशत् विधानसभा-आसनानां मतगणना कराइक्काल-यानम- माहे-नगरेषु सम्पत्स्यते। पश्चिमबङ्गालस्य दक्षिण-24-परगना-जनपदस्य फाल्टा-विधानसभा-क्षेत्रस्य सर्वेषु पञ्चाशीत्यधिक-द्विशतं मतदान-केन्द्रेषु मई-मासस्य एकविंशति-दिनाङ्के पुनर्मतदानं भविष्यति। मतगणना मई-मासस्य चतुर्विंशति-दिनाङ्के सम्पत्स्यते।निर्वाचनायोगेन विज्ञापितं यत् अप्रैल-मासस्य एकोनत्रिंशत्-दिनाङ्के सम्पन्नायां मतदान-प्रक्रियायां लोकतान्त्रिक-प्रक्रियायाः व्यापक-उल्लङ्घनमालक्ष्य एषः निर्णयः स्वीकृतः। पर्यवेक्षकैः तावत् इलेक्ट्रॉनिक-वोटिंग-यन्त्रैः सह सङ्केत-भङ्गः , मतदातृभ्यः भय-प्रदर्शनम् तथा मतदान-नियमानाम् उल्लङ्घनम् इत्यादीनां गम्भीर-त्रुटिनाम् सूचना प्रदत्ता। बहुषु केन्द्रेषु ई.वी.एम. यन्त्राणां पिञ्जोपरि कृष्ण-पट्टिकाः योजिताः आसन्। अनधिकृत-व्यक्तीनां मतदान-केन्द्रेषु प्रवेशः तथा च अन्य-जनैः मतदान-करणम् इत्यादीनां घटनानाम् अपि पुष्टिः कृता ।

## दिल्ली-अग्निकाण्डः

दिल्ल्याः विवेक-विहार-क्षेत्रे अद्य प्रातः चतुर्तलात्मके भवने भीषण-अग्निकाण्डे नवजनाः मृत्युमुपगताः । घटनायाः सूचनां प्राप्यैव चतुर्दश दमकल-वाहनानि घटनास्थलं प्रति प्रेषितानि। अग्निशमनाधिकारिणः मुकेश-वर्मणः वक्तव्यानुसारं प्रातः पञ्च-विंशतिनिमेषाधिक-षड्-वादन-पर्यन्तम् अग्नौ पूर्णतया नियन्त्रणं जातम्। दिल्ल्याः उपराज्यपालः तरनजीत-सिंह-सन्धुः एवं मुख्यमन्त्री रेखा-गुप्ता इत्येतौ घटनामालक्ष्य गभीरं शोकं प्रकटितवन्तौ। उपराज्यपालेन सामाजिकसञ्जालीय-माध्यमेषु मृतानां परिवाराय स्वकीयाः संवेदनाः प्रकटीकृताः। मुख्यमन्त्रिणा प्रोक्तं यत् दिल्ली-सर्वकारः विपत्कालेऽस्मिन् प्रभावित-परिवारैः सह वर्तते, सहैव सम्पूर्ण-स्थितेः निरन्तरं पर्यवेक्षणं जायमानमस्ति।

## ओपेक-प्लस-देशाः

पश्चिम-एशिया-क्षेत्रे जायमानस्य सङ्घर्षस्य मध्ये ओपेक-प्लस-देशैः जून-मासे तैलोत्पादनस्य लक्ष्यं वर्धयितुं सैद्धान्तिकरुपेण सहमतिः प्रकटिता। प्रतिवेदनानुसारं सप्त ओपेक-प्लस-देशाः आगामी-मासे तैलोत्पादनस्य लक्ष्यं प्रतिदिनं प्रायः अष्टाशीति-सहस्राधिकैकलक्षं बैरल-परिमाणेन वर्धयितुं सहमताः सन्ति। भू-राजनैतिक-सङ्कटस्य तथा ओपेक-समूहात् संयुक्त-अरब-अमीरातस्य निवर्तनस्य मध्ये, अयम् अनवरतं तृतीयः मासिक-वृद्धि-क्रमः अस्ति।

## विश्व-प्रेस-स्वातंत्र्य-दिवसः

अद्य विश्व-प्रेस-स्वातंत्र्य-दिवसः अस्ति। अयं दिवसः तावत् प्रेस-स्वातन्त्र्यस्य समर्थनार्थम्, विकासार्थं सहैव विश्वस्मिन् प्रेस-स्वातंत्र्यस्य स्थितेः आकलनस्य अवसरं प्रयच्छति । अस्य वर्षस्य विषयः शान्तिपूर्ण-भविष्यस्य निर्माणम् इति वर्तते।

## ब्रिक्स-उपवेशनम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य अवदत् यत् गैलेक्स-आई इत्यस्य मिशन्-दृष्टिः भारतस्य अन्तरिक्षयात्रायां महतोपलब्धिः अस्ति। विश्वस्य प्रथमस्य ऑप्टो-सार इत्यस्य उपग्रहस्य, भारतस्य बृहत्तमस्य निजी-निर्मितस्य उपग्रहस्य च सफलप्रक्षेपणं नवकल्पनाय राष्ट्रनिर्माणाय च यूनाम् उत्साहस्य प्रमाणम् अस्ति इति श्रीमोदिना सामाजिकान्तर्जालीये पटले उक्तम्। तेन गैलेक्स्-आई इत्यस्य संस्थापकेभ्यः, सम्पूर्णदलाय च अभिनन्दितम्।

## रिजिजू-विपक्षः

केन्द्रीय-संसदीय-कार्यमन्त्री तथा वरिष्ठ-भाजपा-नेता किरेन रिजिजू इत्यनेन आरोपितं यत्, सर्वाणि विपक्षी-दलानि निरन्तरं शासकीय-संस्थासु, निर्वाचनायोगे, ई.वी.एम.यन्त्रेषु, प्रसारमाध्यमेषु च आक्षेपं कृत्वा सम्प्रति न्यायपालिकायां दोषारोपणं कुर्वन्ति।

सामाजिक-सञ्जालीय-माध्यमे स्वस्य सन्देशे श्री-रिजिजू इत्यमुना उक्तं यत्, एतानि दलानि एतत् नावगच्छन्ति यत्, एतादृशानाम् आक्षेपाणां माध्यमेन ते वस्तुतः देशस्य लोकतन्त्रस्य मूल-आत्मनि प्रहारं कुर्वन्ति।

## ईरान-अमरीका

ईरान-सर्वकारेण लेबनान-देशं समेत्य सर्वस्तरेषु युद्ध-समाप्तेः उद्देश्येन अमरीका-सर्वकाराय चतुर्दश-सूत्रीय-योजना प्रस्तुता। ईरानस्य प्रस्तावानुसारं एतेषां विषयाणां समाधानं त्रिंशद्दिनानां अन्तरे भवितव्यम्। अस्मिन् बलं प्रदत्तं यत् कूटनीतिक-प्रयत्नेषु युद्ध-विरामस्य विस्तारः न भवेत्, अपितु युद्धस्य पूर्ण-समाप्तये प्राथमिकता स्यात् । अमरीकायाः राष्ट्रपतिना डोनाल्ड-ट्रम्प इत्यनेन अस्य प्रस्तावस्य विषये स्व-असन्तोषः प्रकटीकृतः। तेन सञ्चेतना प्रदत्ता यत् सैन्य-विकल्पाः अधुनापि विचार-परिधौ उपस्थिताः सन्ति।

## ऋतु-विभाग

भारत-ऋतु-विभागेन अद्य पूर्वोत्तरभारते, केरलम्-राज्ये, माहे-प्रदेशे, पश्चिमवङ्गे, सिक्किमे, तमिलनाडु-प्रदेशे, पुदुचेरी-प्रदेशे च पृथक् पृथक् स्थानेषु प्रचण्डवृष्टेः पूर्वानुमानं प्रकटितम् अस्ति। जम्मू-कश्मीरे, लद्दाखे, छत्तीसगढ़े, तटीय-आन्ध्रप्रदेशे च अद्य मेघवृष्टेः, विद्युत्-स्खलनस्य च सम्भावना विद्यते। अद्य हरियाणायां, चण्डीगढ़े, दिल्ल्यां, बिहारे, ओडिशायां, केरलम् प्रदेशे, पञ्जाबे, मध्यप्रदेशे चापि तथैव स्थितेः संभावना वर्तते। विभागेन अद्य तटीय-आन्ध्रप्रदेशस्य केषुचित् स्थानेषु उष्णतरङ्गस्य स्थितेः अनुमानं प्रकटितम्। ऋतुविभागस्य अनुसारं तमिलनाडु-पुदुचेरी-कारैकल-प्रदेशेषु श्वः यावत् उष्ण-आर्द्र-ऋतोः स्थितिः भवितुम् अर्हति।

## आई. पी. एल.

आई. पी. एल. क्रिकेट्-क्रीडायां आतिथेय-गुजरात् टाईटन्स्-दलं अहमदाबादस्य नरेन्द्रमोदी-क्रीडाङ्गणे पञ्जाब-किङ्ग्स दलं सम्मुखीकरिष्यति। स्पर्धा सायं सार्द्ध-सप्तवादने आरभ्यते। अवधेयं यत् पञ्जाब्-किङ्ग्स् दलं अङ्कतालिकायां निरन्तरं शीर्षस्थाने एव अस्ति। गुजरात् टाईटन्स् दलं च पञ्चमे स्थाने वर्त्तते।

**।। इति वार्ताः ।।**